अथ भवनाद्यर्थकाः

1164. **धान्यानां भवने क्षेत्रे खञ् (5-2-1) ॥विधिसूत्रम् ॥**
भवत्यस्मिन् इति भवनम्। (धान्यानां भवने क्षेत्रेऽर्थे षष्ठ्यन्तेभ्यो धान्य-विशेषवाचिभ्यः प्रातिपदिकेभ्यस्तद्धितः खञ् प्रत्ययः स्यात्) । मुद्गानां भवनं क्षेत्रम् मौद्गीनम्।

1165. **व्रीहिशाल्योर्ढक् (5-2-2) ॥विधिसूत्रम् ॥**
(षष्ठ्यन्ताभ्यां व्रीहिशालि-प्रातिपदिकाभ्यां भवने क्षेत्रे तद्धितो ढक्प्रत्ययः स्यात्) । व्रैहेयम् । शालेयम्।

1166. **हैयङ्गवीनं सञ्ज्ञायाम् (5-2-23) ॥विधिसूत्रम् ॥**
ह्यो गोदोहशब्दस्य हियङ्गुरादेशः, विकारेऽर्थे खञ् च निपात्यते। दुह्यते इति दोहः - क्षीरम्। ह्योगोदोहस्य विकारः हैयङ्गवीनम् = नवनीतम्।

1164. **धान्यानामिति** - भवन्ति जायन्ते उत्पद्यन्तेऽस्मिन् इति भवनम्। उत्पत्तिस्थानं भवनम्। **षष्ठीसमर्थेभ्यः धान्यवाचकेभ्यो भवनेऽर्थे खञ्प्रत्ययो भवति, तद् यदि भवनं क्षेत्रं स्यात्।** यथा मौद्गीनम्।

रूपसिद्धिः

मौद्गीनम् - मुद्गानां भवनं क्षेत्रम् इत्यर्थे 'मुद्ग आम्' इत्यस्मात् ''धान्यानां भवने क्षेत्रे खञ्'' इति खञ्प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात् सुब्लुकि, खस्य ईनादेशे, ''तद्धितेष्वचामादेः'' इति सूत्रेण आदिवृद्धौ, भत्वादकारलोपे, स्वादिकार्ये, 'मौद्गीनम्' इति रूपं सिद्धम्। स्कन्दपुराणे धान्यान्यथा -

यवा-गोधूम-धान्यानि तिलाः कङ्गु-कुलत्थकाः।
माषा मुद्गा मसूराश्च निष्पावाः श्याम-सर्षपाः॥
गवेधुकाश्च नीवास आढक्यश्च सतीनकाः।
चणकाश्चीणकाश्चैव धान्यान्यष्टादशैव तु॥

1165. **व्रीहिशाल्योरिति** -व्रीहिश्चश ालिश्चव्रीहिशाली,त योः= व्रीहिशाल्योः इ तरेतरद्वन्द्वः। **षष्ठ्यन्ताभ्यां व्रीहि-शालिशब्दाभ्यां भवने क्षेत्रेऽर्थे ढक् प्रत्ययः स्यादित्यर्थः।** खञ्प्रत्ययस्यापवादः। यथा व्रैहेयम्। शालेयम्।

रूपसिद्धिः

व्रैहेयम् - व्रीहीणां भवनं क्षेत्रमित्यर्थे 'व्रीहि आम्' इत्यस्मात् खञं प्रबाध्य ''व्रीहिशाल्योर्ढक्'' इति ढक्-प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, ढस्य एयादेशे, कित्वादादिवृद्धौ, भत्वादिकारलोपे, स्वादिकार्ये 'व्रैहेयम्' इति रूपं सिद्धम्।

शालेयम् - शालीनां भवनं क्षेत्रमित्यर्थे 'शालि आम्' इत्यस्मात् ढक्-प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, ढस्य एयादेशे, कित्वादादिवृद्धौ, भत्वादिकारलोपे, स्वादिकार्ये 'शालेयम्' इति रूपं सिद्धम्।

1166. **हैयङ्गवीनमिति** - 'ह्यः' इति पूर्वदिवसे, तदोत्पन्नो गोदोहः = गोपयो 'ह्योगोदोह' इति। **षष्ठ्यन्तस्य ह्योगोदोहशब्दस्य स्थाने हियङ्गुरादेशः विकारेऽर्थेस्यात् खञ्प्रत्ययश्च निपात्यते इत्यर्थः।** यथा हैयङ्गवीनम्।

रूपसिद्धिः

हैयङ्गवीनम् - ह्योगोदोहस्य विकार इत्यर्थे 'ह्योगोदोह ङस्' इत्यस्मात् ''हैयङ्गवीनं सञ्ज्ञायाम्'' इति निपातनात् खञ्प्रत्यये प्रकृतेश्च हियङ्गु इत्यादेशे, सुब्लुकि 'हियङ्गु ख' इति जाते, खस्य ईनादेशे, आदिवृद्धौ, ''ओर्गुणः'' इति भस्य उकारस्य ओकारे गुणे, ''एचोऽयवायावः'' इति अवादेशे, स्वादिकार्ये 'हैयङ्गवीनम्' इति रूपं सिद्धम्।

1167. तदस्य सञ्जातं तारकादिभ्य इतच् (5-2-36) ॥ विधिसूत्रम् ॥

(प्रथमान्तेभ्यस्तारकादिभ्यः सञ्जातमस्य इत्यर्थे तद्धित इतच् प्रत्ययः स्यात्)। तारकाः सञ्जाता अस्य तारकितं नभः। पण्डितः। आकृतिगणोऽयम्।

1168. प्रमाणे द्वयसज्दघ्नञ्मात्रचः (5-2-37) ॥ विधिसूत्रम् ॥

तदस्येत्यनुवर्तते। (तत्प्रमाणमस्य इत्यर्थे प्रमाणे वर्त्तमानात् प्रथमान्तात् प्रातिपदिकाद् द्वयसच् दघ्नच् मात्रच् इत्येते त्रयस्तद्धिताः प्रत्ययाः स्युः) ऊरू प्रमाणमस्य ऊरूद्वयसम्, ऊरूदघ्नम्, ऊरूमात्रम्।

1167. **तदस्येति** - तद्, अस्य, सञ्जातम्, तारकादिभ्यः, इतच् इतिच्छेदः। तारकाशब्दः आदिर्येषां तानि तारकादीनि, तेभ्यः = तारकादिभ्यः तद्गुणसंविज्ञानबहुव्रीहिः। चकारानुबन्धः अन्तोदात्तस्वरार्थः। **प्रथमासमर्थेभ्यः तारकादिभ्यः तद् अस्य सञ्जातमित्यर्थे इतच्-प्रत्ययः स्यादित्यर्थः।** तारकितम्। तारकादिगणो यथा - तारका। पुष्प। कर्णक। मञ्जरी। ऋजीष। क्षण। सूच। (सूचक)। मूत्र। निष्क्रमण। पुरीष। उच्चार। प्रचार। विचार। कुड्मल (वड्मल)। कण्टक। मुसल। मुकुल। कुसुम। कुतूहल। स्तबक (स्तवक)। किसलय। पल्लव। खण्ड। वेग। निद्रा। मुद्रा। बुभुक्षा। धेनुष्या। पिपासा। श्रद्धा। अभ्र। पुलक। अङ्गारक। वर्णक। द्रोह। दोह। सुख। दुःख। उत्कण्ठा (उत्कण्ठ)। भर। व्याधि। वर्मन्। व्रण। गौरव। शास्त्र। तरङ्ग। तिलक। चन्द्रक। अन्धकार। गर्व। मुकुर। हर्ष। उत्कर्ष। रण। कुवलय। गर्ध। क्षुध्। सीमन्त। ज्वर। गर। रोग। रोमाञ्च। पण्डा। कज्जल। तृष्। कोरक। कल्लोल। स्थपुट। फल। कञ्चुक। शृङ्गार। अङ्कुर। शैवल। बकुल। श्वभ्र। आराल। कलङ्क। कर्दम। कन्दल। मूर्च्छा। अङ्गार। हस्तक (हस्त)। प्रतिबिम्ब। विघ्न। तन्त्र। प्रत्यय। दीक्षा। गर्ज। गर्भादप्राणिनि। तन्द्रा। स्रवक। कर। आन्दोल। गोर। राग। आकृतिगणोऽयम्।

रूपसिद्धिः

तारकितं नभः - तारकाः सञ्जाता अस्य (नभसः) इत्यर्थे 'तारका जस्' इत्यस्मात् ''तदस्य सञ्जातं तारकादिभ्य इतच्'' इति इतच्-प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात् सुब्लुकि, भत्वादाकारलोपे, स्वादिकार्ये 'तारकितम्' इति रूपं सिद्धम्।

पण्डितः (पुरुषः) - पण्डा (सदसद्विवेकिनी बुद्धिः) सञ्जाता अस्य इत्यर्थे 'पण्डा सु' इत्यस्मात् इतच्-प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात्सुपो लुकि, भत्वादाकारलोपे, स्वादिकार्ये 'पण्डितः' इति रूपं सिद्धम्। एवमेव पुष्पितो वृक्षः, कुसुमिता लता, बुभुक्षितो बालः, पिपासितः पुरुषः, पुलकितं वपुः, विहितं कार्यम्, व्याधितः, उत्कण्ठितः, तरङ्गितः सागरः, निद्रितः, रोमाञ्चितः देहः, अभ्रितं नभः, गर्वितो मूर्खः, कलङ्किता युवतिः इत्यादयोऽपि बोधनीयाः।

1168. **प्रमाणे इति** - प्रमाणे, द्वयसज्-दघ्नञ्-मात्रचः इतिच्छेदः। द्वयसच् च दघ्नच् च मात्रच् च द्वयसज्दघ्नञ्मात्रचः, इतरेतरद्वन्द्वः। **प्रथमान्ताद् अस्य प्रमाणमित्यर्थे द्वयसच् दघ्नच्, मात्रच् इत्येते प्रत्ययाः स्युः।** यथा ऊरूद्वयसम् इत्यादि।

रूपसिद्धिः

ऊरूद्वयसम् - ऊरू प्रमाणमस्य इत्यर्थे 'ऊरू सु' इत्यस्मात् ''प्रमाणे द्वयसज्दघ्नञ्मात्रचः'' इति द्वयसच् प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, स्वादिकार्ये ऊरूद्वयसम् इति रूपं सिद्धम्।

ऊरूदघ्नम् - ऊरू प्रमाणमस्येत्यर्थे 'ऊरू सु' इत्यस्मात् प्रकृतसूत्रेण दघ्नच्-प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, स्वादिकार्ये 'ऊरूदघ्नम्' इति रूपं सिद्धम्।

ऊरूमात्रम् - ऊरू प्रमाणमस्य (ऊरूप्रमाणं नदीजलम्) इत्यर्थे 'ऊरू सु' इत्यस्मात् ''प्रमाणे द्वयसज्दघ्नञ्मात्रचः'' इति मात्रच् प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, स्वादिकार्ये ऊरूमात्रम् इति रूपं सिद्धम्। स्त्रीत्वे टिड्ढाणञिति ङीपि ऊरूद्वयसी, ऊरूदघ्नी, ऊरूमात्री इति। एवमेव जानुप्रमाणमस्य-जानुद्वयसम्, जानुदघ्नम्, जानुमात्रम्। नाभिः प्रमाणमस्याः - नाभिद्वयसी, नाभिदघ्नी, नाभिमात्री इत्यादयोऽपि।

1169. **यत्तदेतेभ्यः परिमाणे वतुप् (5-2-39) ॥विधिसूत्रम् ॥**
('तत्परिमाणमस्य' इत्यर्थे परिमाणे वर्त्तमानेभ्य प्रथमान्तेभ्यो यत्तदेतेभ्यस्तद्धितसञ्ज्ञो वतुप् प्रत्ययः स्यात्)।
यत् परिमाणमस्य यावान्। तावान्। एतावान्।

1170. **किमिदम्भ्यां वो घः (5-2-40) ॥विधिसूत्रम् ॥** आभ्यां वतुप्, वकारस्य घश्च।

1171. **इदं किमोरीश्की (6-3-89) ॥विधिसूत्रम् ॥**
दृग्दृशवतुषु इदम ईश्, किमः की स्यात्। कियान्। इयान्।

1167. **यत्तदेतेभ्य इति** - यत्तदेतेभ्यः परिमाणे, वतुप् इतिच्छेदः। यत् च तत् च एतत् च तेभ्यः = यत्तदेतेभ्यः इतरेतरद्वन्द्वः। **परिमाणवाचकेभ्यः यद्, तद्, एतद् इति प्रथमासमर्थेभ्य 'तद् अस्य परिमाणम्' इत्यर्थे वतुप्-प्रत्ययो भवतीत्यर्थः।** यथा-यावान्। तावान्। एतावान्।

रूपसिद्धिः

यावान् - यत्परिमाणमस्येत्यर्थे ('जितना' इति भाषायाम्) 'यद् सु' इत्यस्मात् ''यत्तदेतेभ्यः परिमाणे वतुप्'' इति वतुप्-प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात्सुपो लुकि, यद् वत् इति जाते, 'आ सर्वनाम्नः' इति दस्य आत्वे, सवर्णदीर्घे 'यावत्' इति जाते, पुनः प्रातिपदिकसञ्ज्ञायां ''स्वौजस्.'' इत्यादिना प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे यावत् स् इति जाते, ''अत्वसन्तस्य चाऽधातोः'' इति उपधादीर्घे यावात् स् इति जाते, ''उगिदचां सर्वनामस्थानेऽधातोः'' इति नुमागमेऽनुबन्धलोपे, यावान् त् स् इति जाते, ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सुलोपे, ''संयोगान्तस्य लोपः'' इति तलोपे 'यावान्' इति रूपं सिद्धम्। स्त्रीत्वे यावती। नपुंसके यावत्।

तावान् - तत् परिमाणमस्येत्यर्थे 'तद् सु' इत्यस्मात् वतुप्-प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, दस्य आत्वे, सवर्णदीर्घे, तावत् इत्यस्य प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे तावत् स् इति जाते, उपधादीर्घे, नुमागमेऽनुबन्धलोपे, सुलोपे, तलोपे 'तावान्' इति रूपं सिद्धम्। स्त्रीत्वे तावती। नपुंसके तावत्।

एतावान् - एतत्परिमाणमस्येत्यर्थे 'एतद् सु' इत्यस्मात् वतुप् प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, दस्य आत्वे, सवर्णदीर्घे, स्वादिकार्ये 'एतावान्' इति रूपं सिद्धम्। स्त्रीत्वे एतावती एतावत्यौ एतावत्यः। नपुंसके एतावत्, एतावती, एतावन्ति।

1170. **किमिदम्भ्यामिति - तदस्य परिमाणमित्यर्थे प्रथमान्ताभ्यां किमिदम् इति शब्दाभ्यां वतुप् स्याद्, वस्य च घ इत्यर्थः।** किमिदम्भ्यां वतुप्प्रत्ययो भवति इति घविधानमेव ज्ञापकमेतस्य।

1171. **इदं किमोरिति** - इदंकिमोः, ईश्की इतिच्छेदः। ईश् च की च ईश्की, इतरेतरद्वन्द्वे सौत्रत्वाद्विभक्तेर्लुक्। अथवा 'ईश्, की' इत्येवं द्वे पदे बोध्ये। **इदम्, किम् इत्यनयोः क्रमशः ईश् की इत्यादेशौ भवतः, दृग्दृश्वतुषु परेषु।** यथा कियान्। इयान्।

रूपसिद्धिः

कियान् - किं परिमाणमस्येत्यर्थे 'किम् सु' इत्यस्मात् ''किमिदम्भ्यां वो घः'' इति वतुप्-प्रत्ययेऽनुबन्धलोपे वस्य घत्वे च कृते, सुब्लुकि, किम् घत् इति जाते, ''आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्'' इति घस्य इयादेशे, किम् इयत् इति जाते, ''एकदेशविकृतमनन्यवत्'' इति न्यायेन वतु परे ''इदं किमोरीश्की'' इति किमः स्थाने की इति सर्वादेशे, की इयत् इति जाते, भत्वादीकारलोपे, कियत् इति जाते, प्रातिपदिकत्वात् प्रथमैकवचने सुविभक्तौ अनुबन्धलोपे कियत् स् इति जाते, ''अत्वसन्तस्य चाऽधातोः'' इति उपधादीर्घे, उगित्वान्नुमागमे, अनुबन्धलोपे कियान् त् स् इति जाते, हल्ङ्यादिसलोपे, संयोगान्ततलोपे ''कियान्'' इति रूपं सिद्धम्। धीमत्शब्दवद्रूपाणि भवन्ति। स्त्रीत्वे उगित्वात् ङीपि कीयती, कीयत्यौ, कीयत्यः। नदीवत्। नपुंसके कियत्, कियती, कियन्ति। शकृद्वत्।

इयान् - इदं परिमाणमस्येत्यर्थे 'इदम् सु' इत्यस्मात् ''किमिदम्भ्यां वो घः'' इति वतुप्-प्रत्ययेऽनुबन्धलोपे वस्य घत्वे च कृते, प्रातिपदिकत्वात् सुब्लुकि, इदम् घत् इति जाते, घस्य इयादेशे, ''इदंकिमोरीश्की'' इति इदमः ईश् इति सर्वादेशेऽनुबन्धलोपे, ई इयत् इति जाते, भत्वादीकारलोपे, इयत् इति जाते, पुनः प्रातिपदिकत्वात्स्वादिकार्ये 'इयान्' इति रूपं सिद्धम्।

1172. संख्याया अवयवे तयप् (5-2-42) ॥विधिसूत्रम् ॥
(अवयवे वर्त्तमानात् संख्यावाचकात् प्रथमान्तात् प्रातिपदिकाद् अस्येत्यर्थे तद्धितस्तयप् प्रत्ययः)। पञ्च अवयवा अस्य पञ्च तयम्।

1173. द्वित्रिभ्यां तयस्यायज्वा (5-2-43) ॥विधिसूत्रम् ॥
(द्वित्रिभ्यां परस्य तयस्य 'अयच्' इत्यादेशो वा स्यात्)। द्वयम्, द्वितयम्। त्रयम्, त्रितयम्।

1174. उभादुदात्तो नित्यम् (5-2-44) ॥विधिसूत्रम् ॥
उभशब्दात् तयपोऽयच् स्यात् स चाद्युदात्तः। उभयम्।

1172. संख्याया इति – प्रथमान्तात् संख्यावाचकाद् अवयवा अस्येत्यर्थे तयप्-प्रत्ययः स्यादित्यर्थः। यथा पञ्च तयम्।

रूपसिद्धिः

पञ्च तयम् – पञ्च अवयवा अस्य इत्यर्थे 'पञ्च न् जस्' इत्यस्मात् ''संख्याया अवयवे तयप्'' इति तयप्-प्रत्ययेऽनुबन्धलनोपे, पञ्च न् तय इति जाते, ''स्वादिष्वसर्वनामस्थाने'' इति पदसञ्ज्ञायां, ''नलोपः प्रातिपदिकान्तस्य'' इति नलोपे, नपुंसके स्वादिकार्ये 'पञ्च तयम्' इति रूपं सिद्धम्। स्त्रीत्वविवक्षायां ''टिड्ढाणञि ति'' ङीपि, भत्वादकारलोपे, 'पञ्च तयी' इति रूपम्।

1. एवमेव चत्वारोऽवयवा अस्य – चतुष्टयम्।
   (चतुर् इति रेफस्य विसर्गे, विसर्गस्य सत्वे, सस्य षत्वे, ष्टुत्वे रूपम्)
2. षड् अवयवा अस्य – षट्तयम् (षष्+तय इत्यवस्थायां जश्त्वचर्त्वे)।
3. सप्त अवयवा अस्य – सप्ततयम्।
4. अष्टौ अवयवा अस्य – अष्टतयम्।
5. नव अवयवा अस्य – नवतयम्। इत्याद्यपि।

1173. द्वित्रिभ्यामिति – द्वित्रिभ्याम्, तयस्य, अयच्, वा इतिच्छेदः। द्विश्च त्रिश्च द्वित्री, ताभ्याम् = द्वित्रिभ्याम्, इतरेतरद्वन्द्वः। **द्वित्रिशब्दाभ्यां परस्य तयप्-प्रत्ययस्य स्थाने अयच् इत्यादेशो वा स्यादित्यर्थः।** यथा द्वयम् इत्यादि। चकारोऽनुबन्धः अन्तोदात्तस्वरार्थः।

रूपसिद्धिः

द्वयं द्वितयं वा – द्वौ अवयवौ अस्य इत्यर्थे 'द्वि औ' इत्यस्मात् तयप्-प्रत्ययेऽनुबन्धलोपे, सुब्लुकि द्वि तय इति जाते, ''द्वित्रिभ्यां तयस्यायज्वा'' इति विकल्पेन तय इत्यस्य स्थाने 'अयच्' इत्यादेशेऽनुबन्धलोपे द्वि अय इति जाते, भत्वादिकारलोपे, स्वादिकार्ये 'द्वयम्' इति रूपं सिद्धम्। पक्षे अयचोऽभावे द्वितयम् इति रूपम्।

त्रयं त्रितयं वा – त्रयोऽवयवा अस्येत्यर्थे 'त्रि जस्' इत्यस्मात् तयप्-प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, त्रि तय इति जाते, तयस्य विकल्पेन अयच् इत्यादेशे, अनुबन्धलोपे, त्रि अय इति जाते, भत्वादिकारलोपे, स्वादिकार्ये, 'त्रयम्' इति रूपं सिद्धम्। पक्षे विकल्पाभावे (अयचोऽभावे) 'त्रितयम्' इति रूपम्।

1174. उभादुदात्त इति – उभात्, उदात्तः, नित्यम् इतिच्छेदः। उभशब्दात् तयप्प्रत्ययस्य स्थाने अयच् इत्यादेशो भवतीत्यर्थः। स च नित्यम् आद्युदात्तः। यथा उभयम्।

रूपसिद्धिः

उभयम् – उभौ अवयवौ अस्येत्यर्थे ''संख्याया अवयवे तयप्'' इति तयप्प्रत्यये, अनुबन्धलोपे, सुब्लुकि, ''उभादुदात्तो नित्यम्'' इति तयस्य अयच् आदेशे भत्वादकारलोपे उभ् अय इति जाते, स्वादिकार्ये 'उभयम्' इति रूपं सिद्धम्। उभयो मणिः। स्त्रीत्वे टिड्ढाणञि ति ङीपि 'उभयी' इति रूपम्। उभयशब्दस्य द्विवचनं न भवति।

1175. **तस्य पूरणे डट् (5-2-48) ॥विधिसूत्रम् ॥**

(संख्यावाचकात् षष्ठ्यन्तात् पूरणेऽर्थे तद्धितो डट् प्रत्ययः स्यात्) । एकादशानां पूरण एकादशः ।

1176. **नान्तादसंख्यादेर्मट् (5-2-49) ॥विधिसूत्रम् ॥**

डटो मडागमः । पञ्चानां पूरणः - पञ्चमः । नान्तात् किम्? -

1177. **तिविंशतेर्डिति (6-4-142) ॥विधिसूत्रम् ॥**

विंशतेर्भस्य तिशब्दस्य लोपो डिति परे । विंशः । असंख्यादेः किम्? एकादशः ।

1175. **तस्य, पूरण इति** -तस्य,पूरणे,डट् इति च्छेदः । **षष्ठ्यन्तात् संख्यावाचकात् पूरणेऽर्थे डट् प्रत्ययः स्यात् ।** डकारटकारौ इत्सञ्ज्ञकौ । 'अ' इति शेषे भवति । डित्त्वाट्टिलोपः । एकादशः ।

रूपसिद्धिः

एकादशः - 'एकादशानां पूरणः' इत्यर्थे 'एकादशन् आम्' इत्यस्मात् ''तस्य पूरणे डट्'' इति डट्-प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात् सुब्लुकि 'एकादशन् अ' इति जाते, डित्त्वात् ''टेः'' इति सूत्रेण भस्य टेः (अनः) लोपे, स्वादिकार्ये 'एकादशः' इति रूपं सिद्धम् । स्त्रीत्वविवक्षायां टित्त्वात् ''टिड्ढाणञि-ति'' ङीपि 'एकादशी' इति । नपुंसके एकादशम् इति । एवमेव द्वादशः, त्रयोदशः, चतुर्दशः, पञ्चदशः, षोडशः, सप्तदशः, अष्टादशः, इत्यादयोऽपि ज्ञातव्याः ।

1176. **नान्तादिति** - नान्तात्, असंख्यादेः, मट्, इतिच्छेदः । न् अन्तो यस्य तत् नान्तम्, तस्मात् = नान्तात्, बहुव्रीहिः । संख्या आदिर्यस्य तत् संख्यादि, बहुव्रीहिसमासः । न संख्यादि असंख्यादि, तस्माद् असंख्यादेः, नञ्तत्पुरुषः । मटि अकारटकारौ इत्सञ्ज्ञकौ । म् इति शिष्यते । 'मट्' टित् अस्ति अतः ''आद्यन्तौ टकितौ'' इत्यनुसारमयं डट आद्यवयवो भवति । **नान्तात् संख्यावाचकाद् असंख्यादेः परस्य डटः मडागमः स्यादित्यर्थः ।** यथा पञ्चमः ।

रूपसिद्धिः

पञ्चमः - पञ्चानां पूरण इत्यर्थे 'पञ्चन् आम्' इत्यस्मात् ''तस्य पूरणे डट्'' इति डट्-प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात्सुपो लुकि, पञ्चन् अ इति जाते, अन्तरङ्गत्वात् टिलोपं प्रबाध्य ''नान्तादसंख्यादेर्मट्'' इति मडागमे अनुबन्धलोपे पञ्चन् म इति जाते, पदसञ्ज्ञायाम्, 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे, स्वादिकार्ये 'पञ्चमः' इति रूपं सिद्धम् । एवमेव सप्तमः, अष्टमः, नवमः । दशमः ।

1177. **तिविंशतेरिति** -ति(लुप्तषष्ठीकंपदम्),विंशतेः,डिति इति च्छेदः ड् इत् यस्य स डित्,तस्मिन्= डिति, बहुव्रीहिसमासः । **डिति परे विंशतिशब्दस्य भस्यावयवस्य 'ति' इत्यस्य लोपः स्यादित्यर्थः ।**

रूपसिद्धिः

विंशः - विंशतेः पूरणः इत्यर्थे 'विंशति ङस्' इत्यस्मात् ''तस्य पूरणे डट्'' इति डट्-प्रत्ययेऽनुबन्धलोपे, विंशति ङस् अ इति जाते, प्रातिपदिकत्वात्सुपो लुकि, भसञ्ज्ञायाम्, ''तिविंशतेर्डिति'' इति तिलोपे, विंश अ इति जाते तिलोपस्य असिद्धत्वात् यस्येति चेति अलोपाभावे ''अतो गुणे'' इति पररूपे, स्वादिकार्ये 'विंशः' इति रूपं सिद्धम् ।

असंख्यादेः किम्? एकादशः - नान्तादसंख्यादेर्मट् इति सूत्रे असंख्यादेः इति किमर्थमुक्तम्? - असंख्यादेः परस्य एव टडो मडागमः स्यात् । किन्तु एकादशः इत्यत्र नान्तात् संख्यादेः परः डट् अस्ति, अतः मडागमो न भवति ।

1178. षट्-कति-कतिपय-चतुरां थुक् (5-2-51) ॥विधिसूत्रम् ॥

एषां थुगागमः स्याड्डटि। षण्णां पूरणः-षष्ठः। कतिथः। कतिपय-शब्दस्याऽसंख्यात्वेऽपि अत एव ज्ञापकाड् डट्। कतिपयथः। चतुर्थः।

1179. द्वेस्तीयः (5-2-54) ॥विधिसूत्रम् ॥

डटोऽपवादः। द्वयोः पूरणः - द्वितीयः।

1180. त्रेः सम्प्रसारणञ्च (5-2-55) ॥विधिसूत्रम् ॥

तृतीयः।

1178. **षट्-कति इति** - षट्-कति-कतिपय-चतुराम्, थुक्, इतिच्छेदः। षट् च कतिश्च कतिपयश्च चतुश्च षट्कतिकतिपयचतुरः, तेषाम् = षट्कतिकतिपयचतुराम्, इतरेतरद्वन्द्वः। **षष्, कति, कतिपय, चतुर् इत्येषां शब्दानां डटि परे थुगागमो भवति इत्यर्थः।** यथा - षष्ठः।

रूपसिद्धिः

षष्ठः - 'षण्णां पूरणः' इत्यर्थे 'षष् आम्' इत्यस्मात् ''तस्य पूरणे डट्'' इति डट्-प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात्सुपो लुकि, षष् अ इति जाते, ''षट्कतिकपिपयचतुरां थुक्'' इति थुगागमेऽनुबन्धलोपे, षष् थ् अ इति जाते, ''ष्टुना ष्टुः'' इति थस्य ठत्वे ष्टुत्वे, स्वादिकार्ये 'षष्ठः' इति रूपं सिद्धम्। स्त्रीत्वे टिड्ढाणञि ति ङीपि षष्ठी, नपुंसके 'षष्ठम्' इति रूपं भवति।

कतिथः - 'कतीनां पूरणः' इत्यर्थे 'कति आम्' इत्यस्मात् डट्-प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात् सुब्लुकि, थुगागमेऽनुबन्धलोपे कतिथ् अ इति जाते, स्वादिकार्ये 'कतिथः' इति रूपं सिद्धम्।

कतिपयथः - 'कतिपयानां पूरणः' इत्यर्थे 'कतिपय आम्' इत्यस्मात् कतिपयशब्दस्याऽसंख्यात्वेऽपि अत एव ज्ञापकात् ''तस्य पूरणे डट्'' इति डट्-प्रत्ययेऽनुबन्धलोपे, कतिपय आम् अ इति जाते, प्रातिपदिकत्वात्सुब्लुकि, कतिपय अ इति जाते, ''षट्कतिकतिपयचतुरां थुक्'' इति थुगागमेऽनुबन्धलोपे, स्वादिकार्ये 'कतिपयथः' इति रूपं सिद्धम्।

चतुर्थः - 'चतुर्णां पूरणः' इत्यर्थे 'चतुर् आम्' इत्यस्मात् डट्-प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात्सुब्लुकि, चतुर् अ इति जाते, थुगागमेऽनुबन्धलोपे, स्वादिकार्ये 'चतुर्थः' इति रूपं सिद्धम्।

विशेषः - चतुर्शब्दात् पूरणार्थे डट्प्रत्ययस्य अतिरिक्तं ''चतुरश्छयतौ आद्यक्षरलोपश्च'' इति वार्तिकेन छप्रत्यये, आद्यक्षर - लोपे च, छस्य ईयादेशे स्वादिकार्ये 'तुरीयः', यति 'तुर्यः' इति रूपद्वयमपि भवति।

द्वेस्तीय इति - द्वेः, तीयः इतिच्छेदः। **षष्ठीसमर्थाद् द्विशब्दात् पूरणेऽर्थे तीयप्रत्ययः स्यादित्यर्थः।** यथा द्वितीयः।

रूपसिद्धिः

द्वितीयः - 'द्वयोः पूरणः' इत्यर्थे 'द्वि ओस्' इत्यस्मात् ''द्वेस्तीयः' इति सूत्रेण तीयप्रत्यये, प्रातिपदिकत्वात्सुब्लुकि, स्वादिकार्ये 'द्वितीयः' इति रूपं सिद्धम्। स्त्रीत्वविवक्षायां टापि, सवर्ण-दीर्घे 'द्वितीया' इति नपुंसके च 'द्वितीयम्' इत्यपि भवति।

1180. **त्रेः सम्प्रसारणमिति - षष्ठ्यन्तात् त्रिशब्दात् पूरणेऽर्थे तीयप्रत्ययो भवति, त्रि इत्यस्य सम्प्रसारणञ्च स्यादित्यर्थः।** यथा - तृतीयः। डटोऽपवादः।

रूपसिद्धिः

तृतीयः - 'त्रयाणां पूरणः' इत्यर्थे 'त्रि आम्' इत्यस्मात् डट्-प्रत्ययं प्रबाध्य 'त्रेः सम्प्रसारणञ्च ' इति तीयप्रत्यये सुब्लुकि, रेफस्य ऋकारे सम्प्रसारणे तृ इ तीय इति जाते, ''सम्प्रसारणाच्च'' इति ऋकारइकारयो ऋकारे पूर्वरूपे, स्वादिकार्ये 'तृतीयः' इति रूपं सिद्धम्। स्त्रीत्वे टापि, सवर्णदीर्घे तृतीया, नपुंसके तृतीयम् इति।

1181. **श्रोत्रियंश्छन्दोऽधीते (5-2-84) ॥विधिसूत्रम् ॥** श्रोत्रियः। वेत्यनुवृत्तेश्छान्दसः।
1182. **पूर्वादिनिः (5-2-86) ॥विधिसूत्रम् ॥** पूर्वं कृतमनेन – पूर्वी
1183. **सपूर्वाच्च (5-2-87) ॥विधिसूत्रम् ॥**
(विद्यमानपूर्वादपि पूर्वशब्दाद् अनेनेति कर्त्रर्थे तद्धित इनिः प्रत्ययः स्यात्) ।
1184. **इष्टादिभ्यश्च (5-2-88) ॥विधिसूत्रम् ॥**
(प्रथमान्तेभ्य इष्टादिभ्योऽनेनेत्यर्थे तद्धित इनिः प्रत्ययः स्यात्) । इष्टमनेन इष्टी। अधीती।

1181. **श्रोत्रियमिति** – श्रोत्रियम्, छन्दः, अधीते, इतिच्छेदः। **'छन्दोऽधीते' इत्यर्थे द्वितीयान्तात् छन्द्स्शब्दाद् घन्-प्रत्ययः, छन्दसः (प्रकृतेश्च) श्रोत्रादेशश्च निपात्यते इत्यर्थः।** यथा श्रोत्रियः।

रूपसिद्धिः

श्रोत्रियः – 'छन्दोऽधीते' इत्यर्थे 'छन्दस् अम्' इत्यस्मात् ''श्रोत्रियंश्छन्दोऽधीते'' इति निपातनात् घन्प्रत्यये, अनुबन्धलोपे, सुब्लुकि, 'छन्दस्' 'इत्यस्य स्थाने श्रोत्र इत्यादेशः निपात्यते, श्रोत्र घ इति जाते, घस्य इयादेशे, भत्वादकारलोपे, स्वादिकार्ये 'श्रोत्रियः' इति रूपं सिद्धम्।

1182. **पूर्वादिनिरिति** – पूर्वात्, इनिः, इतिच्छेदः। **क्रियाविशेषण-पूर्वशब्दात् 'अनेन' इत्यर्थे कर्तरि इनिप्रत्ययः स्यादित्यर्थः।** अत्र इन् इति शिष्यते।

रूपसिद्धिः

पूर्वी – पूर्वं कृतमनेन इत्यर्थे 'पूर्व अम्' इत्यस्मात् ''पूर्वादिनिः'' इति इनिप्रत्ययेऽनुबन्धलोपे, सुब्लुकि, पूर्व इन् इति जाते, भत्वादकारलोपे, पूर्विन् इत्यस्य प्रातिपदिकसञ्ज्ञायाम्, प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे, पूर्विन् स् इति जाते, ''सौ च'' इत्युपधादीर्घे, पूर्वीन् स् इति जाते, हल्ङ्यादिना सलोपे, नलोपे 'पूर्वी' इति रूपं सिद्धम्।

1183. **सपूर्वाच्चेति** – सपूर्वात्, च, इतिच्छेदः। विद्यमानं पूर्वं यस्य तत् सपूर्वम्, तस्मात् = सपूर्वात्, बहुव्रीहिसमासः। **सपूर्वात् पूर्वशब्दात् च 'अनेन' इत्यर्थे कर्तरि इनिप्रत्ययः स्यादित्यर्थः।** यथा – कृतपूर्वी।

रूपसिद्धिः

कृतपूर्वी – पूर्वं कृतम् अनने इत्यर्थे 'पूर्वं कृतम्' – कृतपूर्वम् इति सुप्सुपा-समासे 'कृतपूर्व सु' इत्यस्मात् ''सपूर्वाच्च'' इति इनिप्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात्सुब्लुकि, भत्वादकारलोपे, कृतपूर्विन् इत्यस्य प्रातिपदिकत्वात् सौ उपधादीर्घे, सलोपे नलोपे च कृते 'कृतपूर्वी' इति रूपं सिद्धम्। एवमेव भुक्तपूर्वी इत्यादयः।

1184. **इष्टादिभ्य इति** – इष्टादिभ्यः, च, इतिच्छेदः। इष्टशब्दः आदिर्येषां ते इष्टादयः, तेभ्यः = इष्टादिभ्यः, तद्गुणसंविज्ञानबहुव्रीहिः। इष्टादिरेकः क्तप्रत्ययान्तशब्दानां गणोऽस्ति। **प्रथमान्त-इष्टादिगणपठितशब्देभ्यः 'अनेन' इत्यर्थे कर्तरि तद्धितसञ्ज्ञकः इनिप्रत्ययः स्यादित्यर्थः।** यथा इष्टी। अधीती। इष्टादिगणो यथा – इष्ट। पूर्त। उपासादित (उपसादित)। निगदित। परिगदित। परिवादित। निकथित। निषादित। निपठित। संकलित। परिकलित। संरक्षित। परिरक्षित। अर्चित। गणित। अवकीर्ण। आयुक्त। गृहीत। आम्नात। श्रुत। आम्नातश्रुत। अधीत। आसेवित। अवधारित। अवकल्पित। निराकृत। उपकृत। उपाकृत। अनुयुक्त। अनुगणित। अनुपठित। व्याकुलित। परिकथित। संकल्पित। पठित। विकलित। निपतित। अनुपठित। व्याकुलित। परिकथित। संकल्पित। पठित। विकलित। निपतित। पूर्जित। परिगणित। उपगणित। अपवारित। उपनत। निगृहीत। अपचित।

रूपसिद्धिः

इष्टी (अध्वरेषु) – इष्टम् अनेन इत्यर्थे ('यज देवपूजासंगतिकरणदानेषु' धातोः क्तप्रत्यये, वचिस्वपि. इत्यादिना सम्प्रसारणे, पूर्वरूपे, षत्वे, ष्टुत्वे च इष्टम् इति रूपम्) अत्र 'इष्ट सु' इत्यस्मात् ''इष्टादिभ्यश्च'' इति इनिप्रत्यये, अनुबन्धलोपे, प्रातिपदिकत्वात्सुब्लुकि, भत्वादकारलोपे इष्टिन् इत्यस्मात् सुप्रत्ययेऽनुबन्धलोपे, उपधादीर्घे, सलोपे नलोपे च कृते 'इष्टी' इति रूपं सिद्धम्।

अधीती (व्याकरणे) – अधीतम् अनेन इत्यर्थे 'अधीत सु' इत्यस्मात् ''इष्टादिभ्यश्च'' इति सूत्रेण इनिप्रत्ययेऽनुबन्धलोपे, सुब्लुकि, भत्वादकारलोपे अधीतिन् इत्यस्मात् सुप्रत्ययेऽनुबन्धलोपे, उपधादीर्घे, सलोपे नलोपे च कृत 'अधीती' इति रूपं सिद्धम्। एवमेव पठिती शास्त्रे, अर्चिती गोविन्दे, उपकृती मित्रेषु, कृती कृत्येषु परिगणिती ज्योतिषि, पूजिती देवेषु, संरक्षिती भृत्यवर्गे इत्यादयोऽपि ज्ञातव्याः। अत्र ध्यात्वयं यत् यदा क्तान्ताद् इनिः क्रियते तदा तस्य इन्नन्तस्य कर्मणि ''क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्'' इति वार्तिकेन सप्तमी भवति।

अभ्यासः

वस्तुनिष्ठात्मकप्रश्नाः –

1. 'पण्डितः' इत्यत्र प्रत्ययोऽस्ति –

(क) क्त (ख) इतच्

(ग) इत (घ) कोऽपि न

2. ऊरूद्वयम् इत्यत्र प्रत्ययः कस्मिन्नर्थे भवति?

(क) प्रमाणे (ख) परिमाणे

(ग) कखौ (घ) कोऽपि न

3. द्वयमित्यत्र तयप आदेशो भवति –

(क) अय् (ख) अयच्

(ग) कखौ (घ) कोऽपि न

अतिलघूत्तरात्मकप्रश्नाः –

4. व्रीहिशालिभ्यां कस्मिन्नर्थे कः प्रत्ययः?

5. हैयङ्गवीनम् इति कस्य विकारः?

6. तारकाः सञ्जाता अस्येत्यस्य तद्धितान्तरूपं किम्?

7. यत्तदेतेभ्यः कस्मिन्नर्थे कः प्रत्ययः?

8. इयान् इत्यत्र कः प्रत्ययः केन क्रियते?

9. संख्यावाचकात् तयप्-प्रत्ययः कस्मिन्नर्थे?

10. षष्ठ्यन्तात् संख्यावाचकात् कस्मिन् अर्थे कः प्रत्ययः?

लघूत्तरात्मकप्रश्नाः –

11. इष्टादिभ्यश्चेति सूत्रार्थं लिखन्तु।

12. व्रीहिशाल्योर्ढक् इति सूत्रार्थं लिखन्तु।

13. किमिदम्भ्यां वो घः इति सूत्रार्थं सोदाहरणं लिखन्तु।

14. द्वित्रिभ्यां तयस्यायज्वा इति सूत्रार्थं लिखन्तु।

निबन्धात्मकप्रश्नाः –

15. अधोलिखित-विग्रहानुसारं ससूत्रं प्रयोगाः साधनीयाः।

1. भवनं क्षेत्रम् 2. पण्डा सञ्जाता अस्य

3. तत्परिमाणमस्य 4. ह्योगोदोहस्य विकारः

5. किं परिमाणमस्य 6. द्वौ अवयवौ अस्य

7. उभौ अवयवौ अस्य 8. एकादशानां पूरणः

9. पञ्चानां पूरणः 10. विंशतेः पूरणः

11. षण्णां पूरणः 12. द्वयोः पूरणः

13. त्रयाणां पूरणः 14. छन्दोऽधीते

15. पूर्वं कृतमनेन 16. इष्टमनेन

17. अधीतमनेन 18. पञ्च अवयवा अस्य

16. अधोलिखितसूत्राणां सोदाहरणं व्याख्या कार्या।

1. संख्याया अवयवे तयप् 2. तस्य पूरणे डट्

3. नान्तादसंख्यादेर्मट् 4. धान्यानां भवने क्षेत्रे खञ्

5. पूर्वादिनिः 6. सपूर्वाच्च

7. यत्तदेतेभ्यः परिमाणे वतुप् 8. प्रमाणे द्वयसज्दघ्नञ् मात्रचः

9. षट्-कति-कतिपय-चतुरां थुक् 10. उभादुदात्तो नित्यम्

17. एकतः शतं पर्यन्तं संख्याः संस्कृते लेखनीयाः।

18. द्वितः दशपर्यन्तं पूरणप्रत्ययान्तसंख्याः पुंल्लिङ्गे स्त्रीलिङ्गे च लेखनीयाः।

19. प्रकरणस्थ-सूत्राणाम् अर्थोदाहरणसहिता सारणी निर्मेया।